Nikaṣa, Vol.-1, Issue-3, 2012 ISSN: 2277-6826

# प्राचीना शिक्षापद्धतिः

बृहस्पतिमिश्रः*

mishrabrihaspati@gmail.com

## सारः

*यथा पशुषु क्रियात्मकज्ञानानि जन्मना एव स्वभावतः भवन्ति तथा मनुष्ये न भवति । सः तु कालान्तरेण सर्वं अभ्यस्यति । परं च अत्र अपरः अपि भेदः वर्तते पशुमनुष्ययोर्मध्ये यत् सः मनुष्यः यत् कालान्तरेण निमित्तान्याधारीकृत्य अभ्यस्यति तत्र सीमा न भवति । यावदपि इच्छति सः तावत् अभ्यस्तुं शक्नोति । अर्थात् मनुष्यं यावदपि वयं शिक्षयामः तावत् सः गृहीतुं समर्थः भवति । इमं विषयम् अधिगत्य अस्माकम् ऋषयः तत्सम्बद्धग्रन्थान् बहून् रचयामासुः । तत्र ते एतादृशीं शिक्षां केन प्रकारेण दातुं शक्नुवन्ति इत्यस्मिन् विषये अवगमयितुमेव ऋषयः वेदम् आधारीकृत्य शिक्षाग्रन्थान् रचितवन्तः । इत्थं शिक्षापद्धत्याः सारभूतं तथ्यमेव अत्र सङ्क्षिप्तरूपेण उपस्थापितमस्ति॥*

अस्यां स्थावरजङ्गमात्मिकायां सृष्टौ जङ्गमेषु, मनुष्येषु, मनुष्येतरेषु बहुषु भेदेषु सत्सु अपि एकः महान् भेदः अस्ति यः अन्यान् सर्वान् भेदान् अतिशेते। सः अस्ति मनुष्ये नैसर्गिकरूपेण स्वभाविकज्ञानं न्यूनतमं भवति किन्तु मनुष्येतरेषु स्वाभाविकज्ञानम् एव अधिकं भवति। यथा यः जीवः यस्यां जात्याम् उत्पन्नो भवति तादृशानि ज्ञानानि स स्वभावत एव जानाति। यथा वानरस्य वृक्षारोहणं कूर्दनञ्च, मूषकस्य किमपि वस्तोः कर्त्तनज्ञानम्, मार्ज्जारस्य आखेटनम्, पक्षिणः नीडनिर्माणम् इत्यादि। यदा जीवः मनुष्यजात्यां शरीरं प्राप्नोति तदा स्वाभाविकज्ञानस्य अभाव एव भवति एकं स्तनपानं परित्यज्य। अन्यद् सर्वं ज्ञानं सः दृष्ट्वा अनुभूय च प्राप्नोति। मनोवैज्ञानिकैः एतादृशाः प्रयोगाः कृताः, प्रसङ्गा अपि प्राप्यन्ते यत् कदाचित् कमपि शिशुम् एकदा वृकाः नीतवन्तः ते तस्य मारणं न कृतवन्तः अपितु पालितवन्तः केषाञ्चन वर्षाणाम् अनन्तरं मनुष्यैः स शिशुः दृष्टः आनीतश्च, तदा सः शिशुः केवलं वृक इव शब्दायते स्म। एतां कथां कदाचित् सत्यरूपेण नापि मन्यामहे किन्तु एतावत्तु सत्यमेव अनुभूयते यत् शिशुः यादृशि वातावरणे तिष्ठति तादृशं ज्ञानमेव अधिगच्छति। एषा एव प्रकृतिः मनुष्यस्य यत् स्वाभाविकज्ञानं न्यूनतरं भवति किन्तु नैमित्तिकज्ञानम् अधिगन्तुं काचित् परासीमा नास्ति। अर्थात् मनुष्यं यदि उत्तमेन प्रकारेण यावत् अपि शिक्षयाम सर्वमपि सः गृहीतुं शक्नोति, अस्मिन् विषये सर्वेऽपि

---

* प्राध्यापकः, श्रीशक्ति-संस्कृत-महाविद्यालयः, नैनादेवी, बिलासपुरम्, हिमाचलम्

Nikaṣa, Vol.-1, Issue-3, 2012 ISSN: 2277-6826

शिक्षाविदः जानन्ति। ऋषिभिरपि एतत् तथ्यं ज्ञातचरम् आसीत्। वेदाः एतान् विषयान् सर्वप्रथमं वर्णितवन्तः।[१]

शिक्षाशब्दः विद्याग्रहणार्थकधातोः[२] कृदन्तेन सिद्ध्यति। एतेन अर्थः अस्ति यत् – यतः विद्यायाः उपादानम् - ग्रहणं भवति सा शिक्षा। पुराकालात् शिक्षा नामकस्य एकस्य वेदाङ्गस्य नाम अपि अस्ति तच्च एकं शास्त्रं यस्मिन् वर्णानां उच्चारणादिप्रक्रियायाः ज्ञानम् वैज्ञानिकम् अध्ययनम् च क्रियते। एतस्य शास्त्रस्य ज्ञातारः विषयग्रन्थनिर्मातारः अनेके ऋषयः पुराकाले अभूवन्, तेषु वैयाकरणशिरोमणिः आचार्यपाणिनिः सुप्रसिद्धः। वेदानां एतद्विषयकग्रन्थाः प्रतिवेदं पृथग् पृथग् उच्चारणादिप्रक्रियायाः ज्ञानार्थं उपदिष्टाः ग्रन्थाः प्रातिशाख्यग्रन्थाः उच्यन्ते।

शिक्षाविद्ययोः भेदः – शिक्षा साधनं भवति विद्या साध्यं भवति अर्थात् शिक्षासाधनेन विद्याप्राप्तिः भवति। विद्यया दुःखनिर्वृत्तिः या अमृतत्वेन अभिधीयते।[३]

विद्या अपि द्विविधा परा अपरा चेति आत्मविदः वदन्ति।[४] द्वयोरपिविद्ययोः प्राप्तये साधनं शिक्षा उच्यते। एतस्याः प्रक्रियायाः क्रमं पद्धतिरूपेण स्वीकुर्वन्ति विज्ञाः। सा च प्रक्रिया द्विमुखी, त्रिमुखी, बहुमुखी च इति आधुनिकाः शिक्षाविदोऽपि स्वीकुर्वन्ति। द्विमुखी – इत्यत्र आचार्यः अन्तेवासी च भवतः।[५] त्रिमुखीप्रक्रियायाम् –आचार्यः,अन्तेवासी, प्रवचनं च। बहुमुखी प्रक्रियायाम् पाठ्यचर्या अपि स्वीक्रियते। तैत्तिरीयोपनिषदि – आचार्यः पूर्वरूपम्, अन्तेवासी उत्तररूपम्, विद्या सन्धिः, प्रवचनं सन्धानम् – इत्यधिविधम् इत्युक्तम्।

पाठ्यचर्चायां ग्रहणसाधनरूपेण पठनं श्रवणं द्वयमपि भवति एतस्य संकेतः ऋग्वेदे दृश्यते –[६]

विद्याधिगमप्रक्रियायां परिस्थितीनाम् अपि महत्त्वपूर्णं योगदानं भवति। अतः उत्तमा परिस्थितिः अध्ययनाय भवेत् इत्यत्र ऋषिभिः बहुसूक्ष्मचिन्तनं कृतम्। सर्वोत्तमा परिस्थितिः कस्यचित् मनुष्यस्य

---

[१] शुक्लयजुर्वेदः ४०/११

[२] शिक्ष विद्योपादाने। धातुपाठः, भ्वादिगणः ६८९

[३] विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ शुक्लयजुर्वेदः, काण्वशाखा ४०/११

[४] द्वे विद्ये वेदितव्ये इति स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च॥ मुण्डकोपनिषत् १/४

[५] आचार्यः पूर्वरूपम्, अन्तेवासी उत्तररूपम्॥ तैत्तिरीयोपनिषत् – शिक्षावल्ली ३-४

[६] ओम् उत त्वः पश्यन्न ददर्श वाचम् उत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासा॥ऋग्वेदः १०/७१/४